## मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् । (२०/२६७७)

[1]मुण्ड मिश्र श्लक्ष्ण लवण व्रत वस्त्र हल कल कृत तूस्त इत्येतेभ्यः [2]करणे णिच् प्रत्ययो भवति। मुण्डं करोति मुण्डयति । मिश्रयति । श्लक्ष्णयति । लवणयति । व्रतात् भोजने तन्निवृत्तौ च – पयो व्रतयति । वृषलान्नं [3]व्रतयति । वस्त्रात् समाच्छादने – संवस्त्रयति । [4]हलिं गृह्णाति हलयति । कलिं गृह्णाति कलयति । हलिकल्यो-रदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थम् । अजहलत् । अचकलत् (म.भा. २.२८) । कृतं गृह्णाति कृतयति । तूस्तानि विहन्ति वितूस्तयति केशान् । [5]विशदीकरोति इत्यर्थः ॥

## धातोरेकाचो हलादेः क्रियासमभिहारे यङ् । (२२/२६२९)

एकाज् यो धातुर्हलादिः क्रियासमभिहारे वर्तते तस्माद् यङ् प्रत्ययो भवति । पौनःपुन्यं भृशार्थो वा क्रिया-समभिहारः । नः पुनः पचति पापच्यते । [6]यायज्यते । भृशं ज्वलति जाज्वल्यते । देदीप्यते । धातोः इति किम्? सोपसर्गादुत्पत्तिर्मा भूत्, भृशं प्राटति (म.भा. २.२८) । एकाचः इति किम् ? भृशं जागर्ति । हलादेः इति किम् ? भृशमीक्षते (म.भा. २.२८) ।

[१९८] सूचिसूत्रिमूत्र्यटचर्त्यशूर्णोतीनां [7]ग्रहणं [8]यङ्विधावनेकाजहलाद्यर्थम् । (म. भा. २.२९)

सोसूच्यते । सोसूत्र्यते । मोमूत्र्यते । अटाट्यते । अरार्यते । अशाश्यते । प्रोर्णोनूयते । [9]भृशं शोभते, भृशं रोचते (म.भा. २.२९) इत्यत्र नेष्यते, अनभिधानात् ॥

## नित्यं कौटिल्ये गतौ । (२३/२६३४)

गतिवचनाद् धातोः कौटिल्ये[11] गम्यमाने नित्यं यङ प्रत्ययो भवति । [12]कुटिलं क्रामति चङ्क्रम्यते । [13]दन्द्र-म्यते । नित्यग्रहणं [14]विषयनियमार्थं, गतिवचना[15]न्नित्यं कौटिल्य एव भवति, न तु क्रियासमभिहारे । भृशं क्रामति[16] ॥

## लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् । (२४/२६३५)

[17]लुप सद चर जप जभ दह दश गॄ इत्येतेभ्यो भावगर्हायां धात्वर्थगर्हायां[18] यङ प्रत्ययो भवति । गर्हितं लुम्पति लोलुप्यते । [19]एवं – सासद्यते । [20]चञ्चूर्यते । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते ।

---

1. मुण्डादिभ्यः फ. 2. करणेऽर्थे फ. 3. संवृतयति ब, न भुङ्क्ते इत्यर्थः इत्यधिकम् ड. 4. हलं ग. 5. विजटीकरोति अ. ब. ई. 6. नास्ति क, वाव्रज्यते फ. 7. उपसङ्ख्यानं फ. 8. यङ्विधाने ड. 9. भृशं शोभते नास्ति क. 10. अनभिधानात् नास्ति ह, व्यवस्थितविभाषा विज्ञास्यते तेन न भवति इत्यधिकम् अ. ड. 11. एव इत्यधिकम् ब. फ. 12. कुटिलं क्रामति नास्ति ब. ई. 13. जङ्गम्यते क. 14. विषयविभागार्थं ह. 15. धातोः इत्यधिकम् फ. ह. 16. इति इत्यधिकम् क. 17. लुपादिभ्यः ह. फ 18. गम्यमानायाम् इत्यधिकम् अ. क. ड. फ. ह. 19. एवं नास्ति अ. फ. 20. नास्ति ब, चरफलोश्च इति नुक् । उत्परस्यातः इति उत्त्वम् । हलि च इति दीर्घः इत्यधिकम् ड.